ॐ

# प्रस्तावना

निखिलं खलु दरीदृस्यमानस्य स्थावरजङ्गमात्मकस्य जगतो धारकोऽप्रतिहतशक्तिसम्पन्नश्च वेदः[1], यथोक्तं महर्षिणा मनुना-

**बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्** [2]।

वेदो हि भारतीयवाङ्मयस्य नूनमेव प्रकर्षरूपः । सांस्कृतिकं दार्शनिकमाध्मायात्मिकञ्च विश्वगुरुत्वं वेदमूलकमेव ।

विद्-ज्ञाने धातुना करणेऽर्थे घञ्प्रत्यये कृते सति वेदशब्दो निष्पद्यते । अतो हि धर्मादिपुरुषाथर्चतुष्टयोपाया येन वेद्यन्ते ज्ञायन्ते, असौ वेद इति वेदशब्दस्य व्युत्पत्तिमूलकोऽर्थः। यथोक्त सायणाचार्येण-

**"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः**[3]**"**

इति। लौकिकपदार्थानां सम्यगवबोधनाय नयनस्य यदुपयोगित्वम् अलौकिकानां तत्त्वानां रहस्यावगमाय तदेवोपयोगित्वं वेदस्य । अलौकिकानां तत्त्वानां निरूपणे लौकिकानां प्रमाणानां शक्तिस्तु प्रतिहता भवति। यत्-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता**[4]।।

मन्त्रसंहितानामाविर्भावादनन्दरं वेदषडङ्गानां समुदयो जातः । अयं नवीनस्य युगस्योदयो ह्युत्तरवैदिकयुगशब्देन विद्वद्भिर्व्यवह्रियते । अस्मिन्नेव युगे वैदिकरीतिव्यहारयोराचारविचारयोः शिक्षादीक्षयोरविचला प्रतिष्ठा सञ्जाता।

---

1 .डॉ.देवेन्द्रनाथत्रिपाठीमतेन

2- मनुस्मृति 12.99

3 - ऋ.भा.भू. पृ. 2

4 - ऋ.भा.भू.,पृ. 105,

शिक्षाकल्पव्याकरणादीनां वेदषडङ्गानां प्रयोजनं तु वेदस्वरूपसंरक्षणं तदर्थज्ञानाबोधनञ्चैवास्ति इदमेवानुमादयन् - **वेदार्थावबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानीति उक्तं सायणाचार्ये ऋग्वेदभाष्यभूमीकायाम्** [5]।

यैरुपायैर्वेदा अङ्ग्यन्ते ज्ञायन्ते तानि वेदाङ्गानीति वेदाङ्गशब्दस्य व्युत्पत्तिमूलकोऽर्थो वेदार्थप्रतिपत्तये वेदाङ्गानामप्रतिमं महत्त्वं द्योतयति। षड्वेदाङ्गानां निर्धारणं तु अतिप्राचीनकाल एव जातम् ।

गोपथब्राह्मण-बौधायनधर्मसूत्र-रामायणप्रभृतिषु प्राचीनेषु अर्वाचीनेषु च प्रामाणिकेषु ग्रन्थेषु वेदाङ्गानां महात्म्यं विशदीयकृतम्। अतोऽसन्दिग्धा खल्वेतेषां प्रामाणिकता । प्रक्तना ऋषयो हि साक्षात्कृतधर्माण आसन्, अतस्ते द्रष्टारः । परवत्तिभिश्च ऋषिभिर्ग्रन्थरूपेण च मन्त्राः श्रुताः । एवं श्रवणादनन्तरं तेषु धर्मदर्शनयोग्यतापादनात्ते श्रुतर्षित्वेन प्रथिताः । तैरेव श्रुतर्षिभिरल्पज्ञानां मानवानां कल्याणार्थं वेदार्थावबोधनोपयोगिशिक्षाकल्पादिषडङ्गानि विरचितानि । इदमेव समर्थयन् यास्कचार्येण निगदितं यत्-

''साक्षात्कृतधर्माणो हि ऋषयो बभूवस्तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नाषिसुर्वेदं च वेदाङ्गानि चेति[6] ।

एवं विश्रुतेषु वेदाङ्गेषु कल्पस्य महत्त्वं द्योतयन् महर्षिणा पाणिनिनोक्तं यत्-हस्तौ कल्पोऽथ पठ्यते । कथनस्यास्यायं अर्थं हृदयस्पर्शी भावो यत् - यथा शारीरिकमानसिकदृष्ट्या च परिपुष्टोऽपि कश्चिज्जनो हस्तं विना शक्तिप्रत्यायकं कर्मकौशलं व्यवहारिकोपयोगित्वं च न परिपुष्यति, तथैव कल्पसाहित्यं विना

---

5 ऋ. भाष्यम् पृ. 116

6 पा.शि. श्लो. 41

अप्रतिहतशक्तिसम्पन्नोऽपि वेदः पुरुषार्थोपयोगित्वं न साधयति । अतो वेदाङ्गेषु कल्पस्य स्थनमतीवमहत्त्वपूर्णमस्ति। कल्पसाहित्यं वैदिककर्मकाण्डयज्ञानुष्ठानविधिप्रत्यायकम् । कल्प्यते समर्थ्यते याप्रयोगोऽत्र, इति कल्पशब्दस्य व्युत्पत्तिमूलकोऽर्थो निगदति सायणाचार्यः स्ववेदभाष्यभूमिकायाम् ।

ब्राह्मणग्रन्थेषु यज्ञानुष्ठानविधिवर्णनमतीवविस्तृतरूपेण कृतमासीत् । कालान्तरे ब्राह्मणग्रन्थानामिदमतीवपरिपुष्टं विस्तृतञ्च यज्ञानुष्ठानवर्णनं क्षीणज्ञानवतां मानवानां मनो नानुरञ्जयति स्म। अत एव ब्राह्मणवर्णितानां यज्ञकर्मणामानुपूर्विक्रमबद्धञ्च सङ्क्षिप्तं तद्वर्णनमपेक्षितं जातम्। तदनन्तरं ह्युत्तरवैदिकयुगस्य युगधर्ममनुसृत्य एतेषां ग्रन्थानां रचना सूत्रकारेण कृता । कल्पसूत्रं नूनमेव वैदिककर्मणां सुव्यवस्थितरूपेण कल्पशास्त्रम्। इदमेव समर्थयति ऋक्प्रतिशाख्यवृत्तिः यथा -

कल्पोवेदहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम् [7] । अनेन प्रकारेण येषां यज्ञकर्मणां विवाहोपनयनादीनाश्च विस्तृतं विवेचनं ब्राह्मणेषूपलभ्यते, तेषामेव क्रमबद्धरूपेण सङ्क्षिप्तञ्च वर्णनं कल्पसुत्रेषु विद्यते । कल्पसूत्राणि ब्राह्मणैरारण्यकैश्च सह साक्षात् सम्बद्धानि सन्ति। अतस्तेषां प्राचीनताऽसन्दिग्धा। कल्पसूत्राणि प्रतिशाखाभिन्नानि सन्ति। ब्राह्मणयुगे वैदिकानामार्याणां यज्ञ एवं प्रधानं धार्मिकं कर्म आसीत्। तेषां यज्ञानामतीवविस्तृतत्वाद् ऋत्विग्भ्यो यागोपयोगिव्यावहारिकाणां संक्षिप्तिनियममानामावश्यकता जाता। अत एव तदानीं प्राक्तनैर्महर्षिभिः कल्पसूत्राणि रचितानि कल्पसूत्राणि अत्यल्पेषु शब्देषु सारगर्भितमधिकारधिकं भावं प्रकटयन्ति।

कल्पसूत्राणां चत्वारो भेदाः सन्ति-श्रौतसूत्रं गृह्यसूत्रं धर्मसूत्रं शुल्बसूत्रम् । एतेषां विभागानां मध्ये श्रौतसूत्रस्य महत्वमतीवसमृद्धमस्ति।

---

[7] ऋ.प्र. वर्गद्वयवृतिः पृ. 13

यतो हि श्रौतसूत्रेष्वेव ब्राह्मणग्रन्थेशु वर्णितानां देवाग्नौ सम्पद्यमानानां यागानुष्ठानानां साङ्गोपाङ्गं वर्णनं मिलति। श्रौतसूत्रेषु शुक्लयजुर्वेदस्य कात्यायनश्रौतसूत्रमतीवमहत्वमस्ति।

अहमपि शुक्लयजुर्वेदीय माध्यानदीय शाखोपरि स्वकीयमुद्देस्यमधिकृत्य कात्यायनश्रौतसूत्रभाष्याणां तुलनात्मकम् समीक्षणम् विषयमधिकृत्य शोधाकार्ये प्रवृतोऽस्मि।

**कात्यायनश्रौतसूत्रस्य परिचयः** भगवतो महर्षेः कात्यायनस्य श्रौतसूत्रप्रणयनेन श्रौतसंरक्षणे महदवदानं विद्यते। अनेन विरचितं श्रौतसूत्रं शुक्लयजुर्वेदीयपरम्परायां महत् स्थानं बिभर्ति। कात्यायनश्रौतसूत्रे प्रथमाध्यायादारभ्य-पञ्चमाध्यायपर्यन्तं यावदस्य विस्तृतं विवेचनं वर्तते। माध्यादिनीयशाखाप्ररम्परया श्रौतयागानां सिद्धान्तिकं विववेचनं दृश्यते।

शुक्लयजुर्वेदीयश्रौतसूत्रेषु कत्यायनश्रौतसूत्रं समुपलब्धमस्ति। शुक्लयजुर्वेदसम्बद्धस्य श्रौतसूत्रस्य स्थानं महत्त्वपूर्ण दृश्यते।

महर्षिणा कात्यायनेन श्रौतसूत्रेऽस्मिन् श्रौतयागानां क्रमपरत्वेन संक्षतिप्तं विवेचनं प्रतिपादितम्। ब्राह्मणेषूपलब्धां सामग्री संयोज्यबोधगम्यं च ग्रन्थरत्नं निरमायि। काण्वमाध्यन्दिनशाखायोः प्रतिपादितं। क्रममाश्रित्य प्रवृतेऽस्मिन् श्रौतसूत्रे अध्यायाः तेषामध्यायानामवान्तरभेदाः कण्डिकानामप्यवान्तरभेदाः सूत्राणि सन्ति। ग्रन्थेऽस्मिन् प्रतिपादिता विषयाः शोधविषय पञ्चाध्यायापर्यन्तं संक्षेपेण प्रस्तूयन्ते। प्रथमाध्याये द्वितीयाद्यध्यायेषु वर्णितानां श्रौतयागीयप्रदार्थानां जैमिनीयदृष्ट्या मीमासां विधाय पारिभाषिकविषयाणां प्रतिपादनं विहितम्। एवमेव श्रौतयागानां प्रतिपाद्यो यो विषयः तद्यथा श्रौतसूत्रस्य श्रौतयागसम्बद्धं सिद्धान्तिकं वर्णनम्। द्वितीयतृतीयाध्याययो समेषां श्रौतयागानां प्रकृतोभूतौ दर्शपूर्णमासौ साङ्गौ प्रतिपादितौ स्तः। एतेषां विषयाणां

सप्रमाणं विस्तृतया वर्णनं कृतमस्ति। चतुर्थेऽध्याये पिण्डपितृयाग-दर्शेष्टि-वत्सापाकरणादयः विकृतिषु दर्शपूर्णमासयोधर्मातिदेशदाक्षायणयज्ञ-आग्रयणेष्टि-अन्वारभणीयेष्टि-अग्न्याधान-पुनराधेय-अग्निहोत्रश्चते विषयजातानि निरूपितानि । पञ्चमेऽध्याये चातुर्मास्यकर्मणि मित्रविन्देष्टिश्च वर्णितानि।

भगवता कात्यायनाचार्येण प्रणीतस्य श्रौतसूत्रस्य इत्यादीनि विषयाः प्रतिपदिताः सन्ति।

दिक्

卐